# नादतनुं अनिशम्

## रागम्ः चित्तरञ्जनि     ताळम्ः आदि

(श्री त्यागराज विरचित)

पल्लवि

नादतनुं अनिशम् शङ्करम्
नमामि मे मनसा शिरसा

अनुपल्लवि

मोदकरा निगमोत्तम साम-
वेदसारं वारं वारम्

चरणम्

सद्योजातादि पञ्चवक्त्रज

स रि ग म प ध नि वर सप्तस्वर

विद्यालोलं विदलितकालम्
विमल हृदय त्यागराजपालम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇